श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे पञ्चदशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे पञ्चदशोऽध्यायः ॥

श्रीशुक उवाच
भरतस्यात्मजः सुमतिर्नामाभिहितो यमु ह वाव
केचित्पाखण्डिन ऋषभपदवीमनुवर्तमानं चानार्या
अवेदसमाम्नातां देवतां स्वमनीषया पापीयस्या
कलौ कल्पयिष्यन्ति ॥ 1 ॥

तस्माद् वृद्धसेनायां देवताजिन्नाम
पुत्रोऽभवत् ॥ 2 ॥

अथासुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां
सुतः परमेष्ठी तस्य सुवर्चलायां प्रतीह उपजातः ॥ 3 ॥

य आत्मविद्यामाख्याय स्वयं संशुद्धो
महापुरुषमनुसस्मार ॥ 4 ॥

प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्या -
कोविदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमाना -
वजनिषाताम् ॥ 5 ॥

भूम्न ऋषिकुल्यायामुद्गीथस्ततः प्रस्तावो
देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज

आसीद्विभुर्विभो रत्यां च पृथुषेणस्तस्मान्नक्त
आकूत्यां जज्ञे नक्ताद् द्रुतिपुत्रो गयो राजर्षिप्रवर
उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रि -
रक्षिषया गृहीतसत्त्वस्य कलाऽऽत्मवत्त्वादि -
लक्षणेन महापुरुषतां प्राप्तः ॥ **6** ॥

स वै स्वधर्मेण प्रजापालनपोषणप्रीणनोपलालना -
नुशासनलक्षणेनेज्यादिना च भगवति महापुरुषे
परावरे ब्रह्मणि सर्वात्मनार्पितपरमार्थलक्षणेन
ब्रह्मविच्चरणानुसेवयाऽऽपादितभगवद्भक्तियोगेन
चाभीक्ष्णशः परिभावितातिशुद्धमतिरुपरतानात्म्य
आत्मनि स्वयमुपलभ्यमानब्रह्मात्मानुभवोऽपि
निरभिमान एवावनिमजूगुपत् ॥ **7** ॥

तस्येमां गाथां पाण्डवेय पुराविद उपगायन्ति ॥ **8** ॥

गयं नृपः कः प्रतियाति कर्मभि -
    र्यज्वाभिमानी बहुविद्धर्मगोप्ता।
समागतश्रीः सदसस्पतिः सतां
    सत्सेवकोऽन्यो भगवत्कलामृते ॥ **9** ॥

यमभ्यषिञ्चन् परया मुदा सतीः
    सत्याशिषो दक्षकन्याः सरिद्भिः।
यस्य प्रजानां दुदुहे धराऽऽशिषो
    निराशिषो गुणवत्सस्नुतोधाः ॥ **10** ॥

छन्दांस्यकामस्य च यस्य कामान्
    दुदूहुराजह्रुरथो बलिं नृपाः।

प्रत्यञ्चिता युधि धर्मेण विप्रा
    यदाशिषां षष्ठमंशं परेत्य ॥ **11** ॥

यस्याध्वरे भगवानध्वरात्मा
    मघोनि माद्यत्युरुसोमपीथे।
श्रद्धाविशुद्धाचलभक्तियोग -
    समर्पितेज्याफलमाजहार ॥ **12** ॥

यत्प्रीणनाद्बर्हिषि देवतिर्यङ्
    मनुष्यवीरुत्तृणमाविरिञ्चात्।
प्रीयेत सद्यः स ह विश्वजीवः
    प्रीतः स्वयं प्रीतिमगाद्गयस्य ॥ **13** ॥

गयाद्गयन्त्यां चित्ररथः सुगतिरवरोधन इति त्रयः
पुत्रा बभूवुश्चित्ररथादूर्णायां सम्राडजनिष्ट ॥ **14** ॥

तत उत्कलायां मरीचिर्मरीचेर्बिन्दुमत्यां बिन्दुमा -
नुदपद्यत तस्मात्सरघायां मधुर्नामाभवन्मधोः
सुमनसि वीरव्रतस्ततो भोजायां मन्थुप्रमन्थू
जज्ञाते मन्थोः सत्यायां भौवनस्ततो
दूषणायां त्वष्टाजनिष्ट त्वष्टुर्विरोचनायां
विरजो विरजस्य शतजित्प्रवरं पुत्रशतं कन्या च
विषूच्यां किल जातम् ॥ **15** ॥

तत्रायं श्लोकः —
प्रैयव्रतं वंशमिमं विरजश्चरमोद्भवः।
अकरोदत्यलं कीर्त्या विष्णुः सुरगणं यथा ॥ **16** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे प्रियव्रतवंशानुकीर्तनं नाम पञ्चदशोऽध्यायः ॥